**शेखरित** *a.* 1 Crested, tufted, peaked. -2 Made into a chaplet or diadem.

**शेपः, शेपस्** *n.*, **शेफः, -फम्, -शेफस्** *n.* 1 The penis; बृहच्छेफाण्डपिण्डिकाः Mb. 10. 7. 39. -2 A testicle. -3 A tail. -Comp. **-स्तम्भः** morbid rigidity and erection of the penis.

**शेपालः, -लम्** Vitex Negundo (Mar. निर्गुंडी).

**शेफालिः, -ली, शेफालिका** *f.* A kind of plant; शेफालिकाकुसुमगन्धमनोहराणि Ṛs. 3. 14.

**शेमुषी** 1 Intellect, understanding; स्वशेमुषीविशेषेण वशीकृतमहीतलम् Śiva B. 5. 3. -2 Resolve, purpose, intention.

**शेरुः** [शी-उर Uṇ. 4. 112] Dozing, sleeping.

**शेल्** 1 P. (शेलति) 1 To go, move. -2 To tremble.

**शेलुः** Cordia Myxa (Mar. भोकर); Ms. 5. 6.

**शेव्** 1 Ā. To worship; see सेव्.

**शेवः** [शुक्रपाते सति शेते, शी-वन् Uṇ. 1. 152, 154] 1 The penis. -2 A snake. -3 Height, elevation. -4 Happiness. -5 Wealth, treasure. -6 An epithet of Agni. -7 Of Soma. **-वम्** 1 The penis (also शेवा). -2 Happiness. -3 Hail! (exclamation addressed to deities). -Comp. **-धिः** 1 a valuable treasure; जानाम्यहं शेवधिरित्यनित्यम् Kaṭh. 2. 10; विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम् Ms. 2. 144; सर्वे कामाः शेवधिर्जीवितं वा स्त्रीणां भर्ता धर्मदाराश्च पुंसाम् Māl. 6. 18; नाशेवधिर्बन्धुषु नाप्यदाता Bu. Ch. 2. 11. -2 one of the 9 treasures of Kubera.

**शेवलम्** [शी-विच् तथा भूतः सन् वलते वल्-अच् Tv.] 1 The green moss-like substance growing on the surface of water. -2 A kind of plant.

**शेवलिनी** A river.

**शेवाल** See शेवल.

**शेष** *a.* [शिष्-अच्] Remaining, rest, all the other; न्यषेधि शेषोऽप्यनुयायिवर्गः R. 2. 4; 4. 64; 10. 29; Me. 30, 89; रम्भे निर्वर्त्यतां शेषो विधिः V. 5; शेषान् मासान् गमय चतुरो लोचने मीलयित्वा Me. 110 (v. l.); Ms. 3. 47; Ku. 2. 44; oft. at the end of comp. in this sense; भक्षितशेष, आलेख्यशेष &c. **-षः, -षम्** 1 (*a*) Remainder, rest, residue; ऋणशेषोऽग्निशेषश्च व्याधिशेषस्तथैव च। पुनश्च वर्धते यस्मात्तस्माच्छेषं न कारयेत्॥ Chāṇ. 40; अध्वशेष Me. 40; प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्पते R. 8. 40; so शेषे वयसः समागतो मृत्युः Bv. 4. 30; त्रिभागशेष Ku. 5. 57; वाक्यशेषः V. 3. &c. (*b*) 1 Surplus, balance. -2 Anything left out or omitted to be said; (इति शेषः is often used by commentators in supplying an ellipsis or words necessary to complete the construction). -3 Escape, salvation, respite. **-षः** 1 Result, effect. -2 End, termination, conclusion. -3 Death, destruction. -4 N. of a celebrated serpent, said to have one thousand heads, and represented as forming the couch of Viṣṇu or as supporting the entire world on his head; किं शेषस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत् Mu. 2. 18; Ku. 3. 13; R. 10. 13. -5 N. of Balarāma (supposed to be an incarnation of Śeṣa). -6 An elephant. -7 Subsidiary अङ्ग; something which is declared as being subservient to something else; शेषः परार्थत्वात् MS. 3. 1. 2 (यस्तु अत्यन्तं परार्थस्तं वयं शेष इति ब्रूमः ŚB.); शेषो हि सादनम् ŚB. on MS. 10. 5. 76. -8 Favour (प्रसाद); 'शेषः संकर्षणे वधे अनन्ते ना प्रसादे च' इति मेदिनी; नैवंशीलाः शेषमिहाप्नुवन्ति Mb. 1. 197. 24. **-षा** The remains of flowers or other offerings made to an idol and distributed among the worshippers as a holy relique; तस्यै स्त्रियस्ताः प्रददुः शेषां युयुजुराशिषः Bhāg. 10. 53. 50; तथेति शेषामिव भर्तुराज्ञामादाय मूर्ध्ना मदनः प्रतस्थे Ku. 3. 22; Ś. 3. **-षम्** The remnants of food, remains of an offering. (शेषे is used adverbially in the sense of 1 at last, finally. -2 in other cases; as in शेषे षष्ठी.) -Comp. **-अन्नम्** leavings of food. **-अवस्था** old age. **-कालः** the time of death. **-जातिः** *f.* assimilation of residues; (in alg.) reduction of fractions of residues. **-पतिः** a manager. **-भागः** the remainder. **-भोजनम्** the eating of leavings; गृहस्थस्य......त्यागः शेषभोजनम् Kau. A. 1. 3. **-रात्रिः** the last watch of the night. **-रूपिन्** *a.* appearing to be secondary. **-शयनः, -शायिन्** *m.* epithets of Viṣṇu.

**शेष्य** *a.* To be ignored, neglected.

**शैक्य** *a.* 1 Suspended in a loop. -2 Pointed, peaked; शैक्यां व्यालीमिवात्युग्रां वज्रकल्पामयोमयीम् Mb. 9. 11. 51. **-क्यः** 1 A kind of sling (Mar. कावड, शिंकें); धारयन्ति महीं द्यां च शैक्यो वागमृतं तथा Mb. 12. 342. 17. -2 A pot kept in such sling; शैक्यं रुक्मसहस्रस्य बहुरत्नविभूषितम् Mb. 2. 49. 27 (see Nīlakaṇṭha com.). **-अयसम्** Damasked steel; शक्रदेवाय चिक्षेप सर्वशैक्यायसीं गदाम् Mb. 6. 54. 24; शैक्यायसानि वर्माणि कांस्यानि च समन्ततः 7. 119. 42 (com. शैक्यायसानि शोणितायोमयानि).

**शैक्षः** [शिक्षां वेत्त्यधीते वा अण्] 1 A student who studies Śikṣā or the science of pronunciation, one who has just entered upon the study of the Vedas. -2 (Hence) A novice, tyro. *-a.* Well familiar with the studies or sciences; expert; Mb. 6. 97. 28 (com. शैक्षं शस्त्रादिशिक्षासंपन्नम्).

**शैक्षिकः** One skilled in Śikṣā.

**शैक्ष्यम्** Learning, proficiency.

**शैखः** The offspring of an outcaste (व्रात्य) Brāhmaṇa; Ms. 10. 21.

**शैखरिकः, -रेयः** The Apāmārga tree.

**शैखिन** *a.* Relating to a peacock.

**शैख्य** *a.* Pointed.